क्रियते यत्तु तत् कार्य्यमादेशप्रत्ययागमम् ॥
यस्मात् परं परे यस्मिन् तन्निमित्तं द्विधा मतम् ।
आकाङ्क्षायान्तु सर्व्वेषामनुवृत्तिः परे भवेत् ॥”
इति ॥

एवञ्च ।
“बहिरङ्गविधिभ्यः स्यादन्तरङ्गविधिर्ब्बली ।
प्रत्ययाश्रितकार्य्यन्तु बहिरङ्गगुदाहृतम् ॥
प्रकृत्याश्रितकार्य्यं स्यादन्तरङ्गमिति ध्रुवम् ।
प्रकृतेः पूर्व्वपूर्व्वं स्यादन्तरङ्गतरं तथा ॥
सावकाशविधिभ्यः स्याद्बली निरवकाशकः ।
कस्यचिद्भिन्नकार्य्यस्य प्रथमे परतस्तथा ।
सम्भवेद्विषयो यस्य स भवेत् सावकाशकः ॥
आदौ हि विषयो यस्य परतो न हि संभवेत् ।
स पण्डितगणैरुक्तो विधिर्निरवकाशकः ॥
तथा सामान्यकार्य्येभ्यो विशेषकविधिर्ब्बली ।
बहवो विषया यस्य स सामान्यविधिर्भवेत् ॥
स्वल्पः स्याद्विषयो यस्य स विशेषविधिर्म्मतः ।
आगमादेशयोर्म्मध्ये बलीयानागमो विधिः ॥
प्रकृतिं प्रत्ययञ्चापि यो न हन्ति स आगमः ।
आदेश उपघाती यः प्रकृतेः प्रत्ययस्य वा ॥
सकलेभ्यो विधिभ्यः स्याद्बली लोपविधिस्तथा ।
लोपस्वरादेशयोस्तु स्वरादेशो विधिर्बली ॥”
इति मुग्धबोधव्याकरणटीकायां दुर्गादासः ॥ * ॥
अथ विधिभेदाः । तत्र कश्चित् प्रधानविधिः । स तु स्वतः फलहेतुक्रियाबोधकः । यथा । यजेत स्वर्गकाम इत्यादि । कश्चिदङ्गविधिः । स तु स्वतः फलहेतुक्रियायां कथमित्याकाङ्क्षायां विधायकः । यथा । दर्शे यजति इत्यादि । कश्चित प्रयोगविधिः । स तु यावदङ्गयुक्तक्रियाबोधकः । यथा । यावदङ्गयुक्तं यजेत विलक्षणस्वर्गकाम इत्यादि । कश्चिद्गुणफलविधिः । स तु आकाङ्क्षानिवृत्तौ अधिकफलाय प्राप्तकर्म्मणि गुणविधिः । यथा । गोदोहेनापः प्रणयेत् पशुकाम इत्यादि । प्रधानविधिश्च द्विविधः । उत्पत्तिर्नियोगश्चेति । तत्रोत्पत्तिस्तु कर्म्मस्वरूपबोधकः । यथा आग्नेयाष्टाकपालः अमावास्यायां पौर्णमास्याञ्चाच्युतो भवति इत्यादि । नियोगश्च स्वर्गकामाद्यधिकारिबोधकः । यथा । स्वर्गकामो यजेत इत्यादि । अङ्गविधिस्तु कालदेशकर्त्त्रादिबोधकतया अनियत एव । प्रधानाङ्गविध्योर्विधेयाप्राप्तिप्राप्तिभ्यां त्रैविध्यम् । तत्र अप्राप्तितो द्वैविध्यम् । तत्राप्यत्यन्ताप्राप्तौ अपूर्व्वविधिः । पक्षतोऽप्राप्तौ नियमविधिः । विधेयतत्प्रतियोगिनोः प्राप्तौ परिसङ्ख्याविधिः । अतएवोक्तम् ।
“विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्या विधीयते ॥”
तत्र प्रधानस्य विधिभेदो यथा । अहरहः सन्ध्यामुपासीत इत्यादिरपूर्व्वविधिः । अत्र विधेयस्य सन्ध्यादेः शास्त्रतो रागतो न्यायतो वा कुत्रचिदप्राप्तेः । तथा ऋतौ भार्य्यामुपेयात् इत्यादिर्नियमविधिः । विधेयस्य भार्य्याभिगमनस्य रागतः प्राप्तावपि रागाभावात् पक्षतोऽप्राप्तेः । तथा । प्रोक्षितं मांसं भुञ्जीत इत्यादिः परिसङ्ख्याविधिः । विधेयस्य प्रोक्षितमांसभक्षणस्य च रागतः प्राप्तेः । अङ्गस्य विधिभेदो यथा । शारदीयपूजायामष्टम्यामुपवसेत् इत्यादिरपूर्व्वविधिः । अत्र विधेयस्योपवासस्य एतदन्यशास्त्रतो रागतो न्यायतो वा कुत्रचिदप्राप्तेः । तथा श्राद्धे भुञ्जीत पितृसेवितमित्यादिनियमविधिः । विधेयस्य श्राद्धशेषभोजनस्य रागतः प्राप्तावपि रागाभावात् पक्षतोऽप्राप्तेः । तथा । वृद्धिश्राद्धे प्रातरामन्त्रितान् विप्रान् इत्यादिः परिसङ्ख्याविधिः । तत्र विधेयस्य प्रातर्निमन्त्रणस्य तत्प्रतियोगस्य पूर्व्वदिनसायं निमन्त्रणस्य च पार्व्वणवन्न्यायतः प्राप्तेरिति स्मृतेरुदाहरणम् । इति धर्म्मदीपिका ॥ * ॥ न्यायमते विधिर्य्यथा,—
“प्रवृत्तिः कृतिरेवात्र सा चेच्छातो यतश्च सा ।
तज्ज्ञानं विषयस्तस्य विधिस्तज्ज्ञापकोऽथवा ॥”
विधिजन्यज्ञानात् प्रवृत्तिर्ज्जायते सा इच्छातः चिकीर्षातः चिकीर्षा च कृतिसाध्यत्वेष्टसाधनत्वज्ञानात् तज्ज्ञानस्य विषयः कार्य्यत्वं इष्टसाधनत्वञ्च विधिरिति प्राचीनमतम् । स्वमतमाह तज्ज्ञापकोऽथवेति इष्टसाधनत्वानुमापक आप्ताभिप्रायो विधिप्रत्ययार्थः । इति हरिदासीयकुसुमाञ्जलिः ॥ * ॥ अपि च आश्रयत्वसम्बन्धेन प्रत्ययोपस्थापितेष्टसाधनत्वान्वितस्वार्थपरपदघटितवाक्यत्वं विधित्वम् । मीमांसकमते इष्टसाधनत्वं कृतिसाध्यत्वञ्च पृथगेव विध्यर्थः । इति गदाधरभट्टाचार्य्यकृतविधिस्वरूपः ॥

विधिदर्शी, [न्] पुं, (विधिं द्रष्टुं शीलमस्य । दृश् + णिनिः ।) सदस्यः । इत्यमरः ॥

विधिदेशकः, पुं, (विधिं दिशतीति । दिश + ण्वुल् ।) सदस्यः । इति शब्दरत्नावली ॥

विधिवत्, व्य, यथाविधि । विध्यनुसारेण । यथा,—
“तोषयेत् सततं भार्य्यां विधिवत् पाणिपीड़िताम् ॥”
इति कालिकापुराणे १८ अध्यायः ॥ * ॥
अपि च ।
“सन्ध्यामुपास्य विधिवत् विल्वपत्रादुपार्च्चयेत् ॥”
इति शिवरात्रिव्रतकथा ॥ * ॥
अन्यच्च ।
“पूजयेद्ब्रह्मविष्ण्वर्करुद्रवस्वात्मकं शिवम् ।
व्रतोपवासैर्विधिवत् श्रद्धया च विमत्सरः ॥”
इति मत्स्यपुराणे योगमाहात्म्यम् ३८ अध्यायः ॥
अपरञ्च ।
“इति नक्षत्रपुरुषमुपोष्य विधिवत् स्वयम् ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीयते ॥”
इति तत्रैव ५१ अध्यायः ॥

विधुः, पुं, (विध्यति विरहिणं विध्यते राहुणेति वा । व्यध ताड़े + “पृभिदिव्यधीति ।” उणा० १ । २४ । इति कुः ।) चन्द्रः । (यथा,—
“पिक ! विधुस्तव हन्ति समं तमस्त्वमपि चन्द्रविरोधिकुहूरवः ।
तदुभयोरनिशं हि विरोधिता
कथमहो समता मम तापने ॥” * ॥
विध्यति असुरानिति ।) विष्णुः । कर्पूरः । इति मेदिनी । धे, १६ ॥ ब्रह्मा । इति शब्दरत्नावली ॥ राक्षसः । इति विश्वः ॥ आयुधः । वायुः । इति संक्षिप्तसारोणादिवृत्तिः ॥ * ॥ चन्द्रस्य द्वादशावस्थास्तत्फलादिश्च यथा,—
“चन्द्रस्य द्वादशावस्था भवन्ति प्रहर्षु ता अपि ।
त्रिषु त्रिषु च ऋक्षेषु अश्विन्यादि वदाम्यहम् ॥
प्रवासस्थं पुनर्नष्टं मृतावस्थं जयावहम् ।
हास्यावस्थं क्रीड़ावस्थं प्रमोदावस्थमेव च ।
विषादावस्थभोगस्थे ज्वरावस्थं व्यवस्थितम् ॥
कम्पावस्थं सुस्थावस्थं द्वादशावस्थगं भवेत् ॥
प्रवासो हानिर्मृत्युश्च जयो हासो रतिः सुखम् ।
शोको भोगो ज्वरः कम्पः सुस्थावस्थाक्रमात् फलम् ॥
जन्मस्थः कुरुते तुष्टिं द्वितीये नास्ति निर्वृतिः ।
तृतीये राजसम्मानं चतुर्थे कलहागमः ॥
पञ्चमेन स्त्रगाङ्केण स्त्रीलाभो वै तथा भवेत् ॥
धनधान्यागमः षष्ठे रतिः पूजा च सप्तमे ।
अष्टमे प्राणसन्देहो नवमे कोषसञ्चयः ॥
दशमे कार्य्यनिष्पत्तिर्ध्रुवमेकादशे जयः ।
द्वादशेन शशाङ्केन मृत्युरेव न संशयः ॥”
इति गारुड़े । ६१ । ३—८ ॥ * ॥
चन्द्रस्य क्षयवृद्धिकारणम् यथा,—
ब्रह्मोवाच ।
“राका चानुमती चैव द्विविधा पूर्णिमा मता ।
सिनीवाली कुहुश्चैव अमावास्या द्विधैव तु ॥
अमा नाम रवे रश्मिश्चन्द्रलोके प्रतिष्ठिता ।
यस्मात् सोमो वसत्यस्याममावासी ततः स्मृता ॥
पूर्व्वोदितकलाभिन्नपौर्णमास्या निशाकरे ।
पूर्णिमानुमती ज्ञेया पश्चादस्तमितभास्करे ॥
यस्मात्तामनुमन्यन्ते देवताः पितृभिः सह ।
तस्मादनुमती नाम पूर्णिमा प्रथमा स्मृता ॥
यदा चास्तमिते सूर्य्ये पूर्णचन्द्रस्य चोद्गमः ।
युगपत् सोत्तरा रागस्तदानुमतिपूर्णिमा ॥
राकान्तामनुमन्यन्ते देवताः पितृभिः सह ।
रञ्जनाच्चैव चन्द्रस्य राकेति कवयोऽब्रुवन् ॥
सिनीवालीप्रमाणन्तु क्षीणशेषो निशाकरः ।
अमावास्यां विशत्यर्कं सिनीवाली ततः स्मृता ॥
कुहेति कोकिलेनोक्तो यः कालस्तु समाप्यते ।
तत्कालसंज्ञा त्वेषा वै अमावास्या कुहूः स्मृता ।
अनुमत्याश्रवाः कार्य्या सिनीवाल्याः कुहूं विना ।
एतासां विरलः कालः कुमान्त्रेति कुहूः स्मृता ॥
कलाः षोड़श सोमस्य शुक्ले वर्द्धयते रविः ।
अमृतेनामृतं कृष्णे पीयते दैवतैः क्रमात् ॥
प्रथमां पिबते वह्निर्द्वितीयां पवनः कलाम् ।
विश्वेदेवास्तृतीयान्तु चतुर्थीन्तु प्रजापतिः ॥
पञ्चमीं वरुणश्चापि षष्ठीं पिबति वासवः ।